शक्नोति [1]इति शका। स्थग्रहणं विस्पष्टार्थम्। ककारमात्रं [2]प्रत्ययो नास्ति इति सामर्थ्यात् प्रत्ययस्थस्य ग्रहणं शक्यते विज्ञातुम्। कात् इति किम्? मण्डना। रमणा। पूर्वस्य इति किम्? परस्य मा भूत्, पटुका। मृदुका। अतः इति किम्? गोका। नौका। तपरकरणं किम्? राका। धाका। आपि इति किम्? कारकः। [3]धारकः। अथ आपि इत्यनेन किं [4]विशिष्यते? ककारः। यद्येवम्, कारिका इत्यत्रापि न प्राप्नोति, अकारेण व्यवहितत्वात्? एकादेशे कृते नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवति इति व्यवधानमेव? वचनाद् व्यवधानमीदृशं यत् स्थानिवद्भावकृतम् एकेन वर्णेन तदाश्रीयते[5]। रथकट्यादिषु तु श्रुतिकृतमनेकेन वर्णेन व्यवधानम् इति इत्वं न भवति। असुपः इति किम्? बहवः परिव्राजका अस्यां मथुरायाम् बहुपरिव्राजका मथुरा। सुबन्तादयं बहुपरिव्राजकशब्दात् परः आप् इति प्रतिषेधो [6]भवति। प्रसज्यप्रतिषेधश्चायम्, न पर्युदासः। पर्युदासे हि [7]सति समुदायादसुबन्तात् परः आप् इति इत्वमत्र स्यादेव। अविद्यमानः सुप् यस्मिन् सोऽयम् असुप् इति? एवमपि नाश्रीयते। तथा हि सति [8]बहुचर्मिका इत्यत्रापि न स्यात्।

[८४७] मामकनरकयोरुपसङ्ख्यानं कर्तव्यमप्रत्ययस्थत्वात्। (म. भा. ३.३२४)

मम इयं मामिका। [9]नरिका। अणि ममकादेशः। केवलमामक (४.१.३०/४८८) इति नियमात् सञ्ज्ञाछन्दसोः ईकारो नास्त्यत्र, तेन अण्प्रत्ययान्तादपि टाप् भवति, नरान् कायति इति नरिका। '[10]आतोऽनुपसर्गे कः' (३.२.३/२९१५) इति कः प्रत्ययः।

[८४८] [11]प्रत्ययनिषेधे त्यक्त्यपोश्चोपसङ्ख्यानम्। (म. भा. ३.३२४)

'उदीचामातः स्थाने यकपूर्वायाः' (७.३.४६/४६५) इति विकल्पो मा भूत् इति। दाक्षिणात्यिका। इहत्यिका॥

## न यासयोः। (४५/४६४)

या सा इत्येतयोः[12] इकारादेशो न भवति। यका। सका। या सा इति निर्देशोऽतन्त्रम्, यत्तदोरुपलक्षणमेतत्। इहापि प्रतिषेध इष्यते, यकां यकामधीमहे तकां तकां पचामहे (म. भा. ३.३२५) इति।

[८४९] यासयोरित्त्वप्रतिषेधे त्यकन उपसङ्ख्यानम्। (म. भा. ३.३२५)

उपत्यका। अधित्यका।

[८५०] पावकादीनां छन्दस्युपसङ्ख्यानम्। (म. भा. ३.३२५)

'हिरण्यवर्णाः शुचयः पावकाः' (अ. वे. १.३३.१)। यासु अलोमकाः। छन्दसीति किम्? पाविका।

[८५१] आशिषि चोपसङ्ख्यानम्[13]। (म. भा. ३.३२५)

जीवतात् जीवका। नन्दतात् नन्दका। भवतात् भवका।

---

1. इति नास्ति इ. 2. हि इत्यधिकम् ड. इ. ह. 3. हारकः इ. 4. विशेष्यते इ. 5. पुत्रकाम इत्यादिषु इत्यधिकम् इ. 6. भवति नास्ति क. 7. सति नास्ति इ. 8. बहुवर्मिका ब. 9. नरिका नास्ति ब. 10. वाक्यमिदं नास्ति ब. 11. प्रत्यय–इहत्यिका नास्ति क. 12. कात्पूर्वस्य इत्यधिकम् क. 13. कर्तव्यम् इत्यधिकम् क. इ.